नं. — ४९८८

नाम. आगम कल्पलता

कर्ता श्री यदुनाथ शर्मा.

पत्र सं. ७ ——— सं. x

विषय: तन्त्रम्

आगमकल्पलता

४९८८

4988

#5 double

F. = 7

प्र. क.
१

ॐ नमः कमलदलनयनाभिरामाय रामचंद्राय ॐ स्वस्तिश्रीगुरुभ्यो नमः ॐ नमः शिवाय ॐ य
मात्पंकजयुग्मं हृदि संनिवेश्य विश्वं सृजत्यविकलं खलु पद्मजन्मा विष्णुश्च पालयति संहरते महेशस्तं
देवमादिसततं शिरसा नतोस्मि १ नत्वा गिरीशं गिरिजां गणेशं वाणीं महेशं स्वगुरोश्च पादपल्लवम् विलो
क्य शास्त्रं यदुनाथशर्मणा वितन्यते ह्यागमकल्पवल्ली २ तथा प्रपंचसारसिद्धांते शारदातिलकं तथा
ख्यां सपरिस्कारमालोक्य तथा सारसमुच्चयम् यत्नेन दीपिकां दृष्ट्वा तथा च लघुदीपिकां तथा पूजाप्रदी
पं च गुरुस्मरणचंद्रिकाम् मंत्रमुक्तावलीरत्नावलीं ज्ञानार्णवादिकान् तंत्रं सनत्कुमारस्य नारदीयं च
गौतमं कूर्मयागं सोमशंभुमतं चागस्त्यसंहिताम् वैखानसीसंहितां हृत्तत्त्वसाराख्यसंहिताम् संहि
तां कपिलप्रोक्तां श्रीमंत्रवरसंहिताम् तंत्रे श्रीभुवनेशस्य पूर्णानंदसिद्धांतमादरात् कल्पं श्रीनवदुर्गायाः
तंत्रं सम्मोहनाख्यकम् हयग्रीवमतं तद्वत्तथा विज्ञानभारतं शुद्धं च मंत्रराजं च तान् दृष्ट्वा च पुनः पुनः
सर्वेषां संहितां चैव तथा वै पिंगलामतम् वामकेश्वरतंत्रं च समस्तेरामदीक्षितम् विज्ञानेश्वरसिद्धांत
सारश्रीसंहिताक्रमात् विज्ञानललितां पंचरात्रीं नारायणीमपि वसिष्ठसंहितां गार्ग्यसंहितां भैरवतं
त्रां दिव्यसारस्वतचित्रेदिकां कामिकमादरात् होमोवरोत्तरं यंत्रप्रतिष्ठासारसंग्रहम् संहितां वायवी
तद्वत्संहितां ब्राह्मणलक्षणां कृशानोः संहितां ब्रह्मविष्णुरुद्रादियामलान् तथैव यामलोद्धारमस्य १

सक्रमपिक्रमात् पार्वतीहरसंवादं वाराहीतंत्रमातरात् तथैव कुब्जिकातंत्रं त्वरिताज्ञानमार्णवात् त
थैव योगिनीतंत्रं क्रमशास्त्रपुराणवम् ईशानसंहितां तद्वत् सिद्धांते विश्वकर्मणः तंत्रं श्रीदक्षिणा।
मूर्तिवैशंपायनसंहिताम् कुलचूडामणिं तद्वद्भावचूडामणिं तथा कुलार्णवं कुलश्रेष्ठं हंसपारायणं
तथा पुराणे विविधे तद्वत्स्मृतिशास्त्राणि भारतम् ज्योतिःशास्त्राणि चालोक्य सकलां पद्धतिं क्रमात्
ग्रन्थे ये संग्रहाः संति तान् दृष्ट्वा च पुनः पुनः सर्वेषां सारमुद्धृत्य यदुनाथेन धीमता विधानं यंत्रमंत्रा।
णां दीक्षादीनां प्रपंचितम् ज्ञानात्सारतो ज्ञेयं विभाव्य च गुरुर्गुरुः नानातंत्रसमुद्भेदाणां ज्ञानं कु
डितिदुर्लभम् अतस्तेषां प्रबोधाय विचार्याति प्रयत्नतः ज्ञानाय मेदवद्धीनां समासेन प्रवक्षते पं
करुणैव प्रार्थ्यंते साधियो मया न्यूनातिरिक्तता चात्र शोधनीया महाशयैः तथादीक्षितमत्स्यानाय
द्दोषं कथयामि तत् यज्ज्ञात्वा मानवा नित्यं दीक्षां कुर्वंति सत्तमः अगस्त्यसंहितायाम् अदीक्षितानाम
त्यानां दोषं स्पष्टमेव तु पंडिताः अन्नं विष्ठासमं तस्य जलं मूत्रसमं तथा अदीक्षितकृतं श्राद्धं श्राद्धादीं वि
तस्य च गृहीत्वा पितरस्तेषां नरके च सदाकृते पतंत्येव हि संदेहो यावदिंद्राश्चतुर्दश सदा तैस्तो पा।
चौरस्य भक्तिपुत्रो जपेद्यदि तथाप्यदीक्षितस्यार्चां देवा रक्षंति नैव च कर्मो विलं च्युत्थाय स्नानसंध्या।

ग्रा·क· दुर्दीक्षितः पशुः तस्माददीक्षितेन दृष्ट्वा किंचित्कार्यं न साधयेत् दीक्षाग्रहणकाले तु पापराशिः पलायते
२ निर्वाणपदसंयुक्तो वह्निर्गोक्षुतितत्परः तदा देवपितॄणां तु कार्ये योग्यो भवति स्वयं अन्यथा यत्कृतं तेन
मे कृतं भस्मनि हुतवत् सर्वाश्रमेषु दीक्षायां नित्यत्वं परिचक्षते अनीश्वरस्य मंत्रस्य नाधिकारो यथा
भुवि तथा दीक्षाविहीनस्य नेह सामीप्यं तत्र च व्रततपोभिर्जपैर्होमैर्विविधैर्वापि साधनैः न क्रिया वि
कदाचित् दीक्षाहीनस्य सिद्ध्यति किंचिदिति शेषः दीक्षामूलं जपं सर्वं दीक्षामूलं परं तपः दीक्षामा
2 श्रित्य निवसेद्यत्र कुत्राश्रमे वसन् अदीक्षितस्समर - - - यद्धीनः शुचिः सुवेशस्तरुणः सर्वभू
तहिते रतः श्रीमानत्युद्धतमतिर्भेदाभेदविमर्शकः आस्तिकः सुकृतधीः शांतः कृतज्ञः शिष्यवत्सलः
निग्रहानुग्रहे शक्तः सभीमंत्रपरायणः ऊहापोहप्रकारज्ञः सर्वभूतकृपालयः इत्यादिलक्षणोपेतो
गुरुः स्यादिति मे मतिः शारदातिलके मातृतः पितृतः शुद्धः शुद्धभावो जितेन्द्रियः सर्वागमानां सार
ज्ञः सर्वशास्त्रार्थतत्त्ववित् परोपकारनिरतो जपपूजादितत्परः अमोघवचनः शांतो वेदवेदार्थपा
रगः योगमार्गानुसंधायी देवताहृदयंगमः संसारोद्धारणे शक्तो दान्तस्सुब्राह्मणोत्तमः मंत्राणां च
रहस्यज्ञो मंत्रवित्साधकोत्तमः उदारः सत्यवादी च शुद्धस्तोत्रहरुच्यते इत्यादिगुणसंपन्नो गुरुरागमसं २

मतः देव्यागमे शिववाक्यम् शांतो दांतः कुलीनश्च विनीतः शुद्धवेशवान् शुद्धाचारः सुप्रतिष्ठः।
शुचिर्दक्षः सुबुद्धिमान् आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः निग्रहानुग्रहे शक्तो गुरुरित्यभिधीय
ते तथा चोक्तं सारसंग्रहे गृहीतमंत्रस्य पक्वयो गुरुश्चेद्दोषसंयुतः श्वित्री च क्षयरोगी च पातकी व्रणहा।
पिवा एवंविधगुरोस्त्यक्त्वा सद्गुरुं समुपाश्रयेत् तथा च गौतमीये गृहीतमंत्रस्त्यक्तव्यः साधकेन सदै
व हि अरिगेहस्थितो मंत्रो यस्तूच्चार्थे च यो मतः संस्काररहितो मंत्रो विधिदीक्षाविवर्जितः त्यक्तव्यः स।
र्वप्रयत्नेन पुनर्ग्राह्यो यथाविधिः अतएवं पितृदीक्षा यतेर्दीक्षा दीक्षा च वनवासिनः विविक्तस्य
च या दीक्षा सा कल्याणनाशिनी स्कंदपुराणे साध्यसाध्यं च यन्मंत्रं मर्थयिं वा महेश्वरि स्वप्नलब्धोपि
यो मंत्रस्तन्मंत्रं यत्नतस्त्यजेत् नीचवर्णाच्च दीक्षां यत्नाद्यैवानसादपि विविक्ताच्च यतेश्चैव पितृदीक्षां।
विवर्जयेत् रुद्रयामलपुराणे पितृमंत्रं न गृह्णीयात्तथा मातामहादपि कनिष्ठात्सोदराच्चापि वैरपक्षा
श्रितात्तथा प्रमादाद्वा तथाज्ञानात्पितुर्दीक्षां समाचरेत् प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् पि
तृदीक्षा यतेर्दीक्षा दीक्षा च वनवासिनः अनाश्रमीणां या दीक्षा सा दीक्षा धननाशिनी तदुक्तं नाराय
णीतंत्रे पितृमंत्रं न गृह्णीयात्तथा शैवाश्रितस्य च कदाचिदपि गृह्णाति पुनः संस्कारमर्हति इत्यादि।
वचनादेभ्यो मंत्रं न गृह्णीयादित्यर्थः तथा च निर्वीर्यं च पितृमंत्रं शैवशाक्तेन दुष्यति इति कौलि।

प्रा॰क॰ कुमंत्रदीक्षापरस्य योगिनीतंत्रे शाक्तविद्यामधिकृत्य दीक्षानिषेधात् महातीर्थे उपरागे सति सर्वत्र न।
२ दोषः सा च एष्टंतव्या ब्रह्मन् त्वत्स्वामिसकलेन व ब्रह्मणा कथितं पूर्वं वसिष्ठाय महात्मने वसिष्ठोपि।
स्वपौत्राय मत्पित्रे दत्तवान् स्वयम् प्रसन्नहृदयः स्वकः पिता मे करुणानिधिः कुरुक्षेत्रे महातीर्थे सूर्यपर्व
णि दत्तवान् इत्यादि वैशंपायनसंहितायां शौनकं प्रति व्यासवाक्यात् विष्णुमंत्रमपि पितृदत्तं गृह्णीयादिति
भावः प्रायश्चित्तं तु पुतगायत्रीजपः सर्वत्र तथात्वदर्शनात् योगिनीतंत्रे निर्वीर्यं च पितुर्मंत्रं तथा माता
3 महस्य च स्वप्नलब्धं स्त्रियादत्तं संस्कारेणैव शुध्यति स्वप्नलब्धे च कलशे गुरोः प्राणान् निवेशयेत् वटपत्रे।
कुंकुमेन लिखित्वा ग्रहणं शुभम् ततः सफलमाप्नोति त्वन्यथा विफलं भवेत् इदं तु सद्गुरोरभावे तत्स
त्वे तस्मादेव गृह्णीयादिति स्वप्ने तु कालनियमः स्वप्ने तु नियमो नहीति नारदवचनात् वर्जनीयस्तु।
हं व देवमंत्रिणां दिव्यकाम्यया तथा च बृहन्नारदपुराणे गृहीत्वा मंत्रं पुत्रस्य कुष्ठी च वामनस्तथा कुनखी।
श्यावदंतश्च हीजिनो व्याधिकांगकः हीनांगः कपटी रोगी बह्वाशी वक्रजल्पकः एतैर्दोषैर्विहीनो।
यः स गुरुः शिष्यसम्मतः अथेदानीं ग्रंथकारैः शिष्यलक्षणमुच्यते तथा च रुद्रयामले स्वचित्तमातृजो
दोषः पत्नीपापं स्वभर्तरि तथा शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितं अतो विचार्य यत्नेन शिष्यलक्ष
णमुच्यते तथा च सारदातिलके शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः अधीतवेदः कुशलो दू २

रम्यङ्गो मनोभवः हितैषी प्राणिनां नित्यं आस्तिको न तु नास्तिकः स्वधर्मनिरतो भक्त्या पितृमातृहितो-
द्यतः वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः एतादृग्गुणोपेतः शिष्यो भवति नापरः तथा च यामले
शिष्यस्तु हि मनोज्ञानी गुरुकार्थपरायणः अधीतशास्त्रतत्त्वज्ञो हितैषी प्राणिनां सदा नास्तिकाचारर-
हित आस्तिकस्तु जितेन्द्रियः स्वधर्मनिरतः शुद्धः पितृमातृहिते रतः शुश्रूषुर्गुरुभक्तश्च जिज्ञासुः श्रद्-
धान्वितः कामक्रोधादिरहितो निर्विष्टो मंत्रसज्जने वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः सर्वदा
मनातितीर्थस्वभावाद्वैर्भवेद्दुःखवित् ब्राह्मणो धर्ममोक्षार्थी कामार्थी विगतस्पृहः किं वा धर्मार्थी
मोक्षार्थी निष्कामश्चाथवा द्विजः मातृवद्गुरुपत्नीषु भ्रातृवच्च सुतेष्वपि देववद्वा सदा तेषु भक्त्या सज्जन-
माचरेत् एतेसदैवाङ्कंण्यावर्ज्यानन्यान्विबोधत इदानीं वर्ज्यशिष्याणां लक्षणं कथयामि च पाशाक्र-
शो अलसाः मलिनाः क्रुद्धा दाम्भिकाः कृपणाः खलाः दारिद्र्यरोगिणः क्लिष्टा रागिणो भोगलालसाः
असूयामत्सरग्रस्ताः शठाः परुषवादिनः अन्यायोपार्जितधनाः परदाररताश्च ये विदुषां वैरिणश्चैव।
अज्ञाः पण्डितमानिनः भ्रष्टव्रताश्च ये केचित् लिप्सवः कष्टलालसाः बह्वाशिनः क्रूरचेष्टा दुरात्मानश्च नि-
न्दिताः इत्येवमादयोऽप्यन्ये पापिष्ठाः पुरुषाधमाः एवंभूतान्परित्यज्य शिष्यत्वे नोपकल्पयेत् यद्यो।
तेऽपकल्पयेन्देवताः क्रोधभाजनाः भवन्तीह दरिद्रास्ते पुत्रदारविवर्जिताः नरकाश्चैव देहान्ते तिर्यक्त्वं

ग्रा॰ कु॰ प्रभवंतिते स्वर्गाः प्रलोभिनास्तेभ्यो निंदितेभ्यो दिशंतिये विना शास्त्रैव सकलं सैकतः शालिबीजव।
४ त् तथाच सारसंग्रहे शठः क्रूरश्च मूर्खश्च लुब्धको भक्तिवर्जितः अतिसाहसिकश्चैव दूषितो देवनिंद।
कः कुलनिंदापरश्चैव परदाररतस्तथा एतैर्दोषैर्विहीनो यः स शिष्यः शिष्टसंमतः न देयं परशिष्येषु प
रिचर्येरतेष्वपि ब्रह्मवैवर्ते प्रातिकूल्यं गुरोर्नित्यं मनसापि न कारयेत् सदाशिवधिया नित्यमेकग्रामनि
५ वासिनाम् गुरुं विदूरे वंदेत मनसा वदनं चरेत् प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुं वराभयकरं शां
तं स्मरेत्तन्नामपूर्वकम् ॐ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे
नमः ब्रह्माविष्णुशिवादीनां पूजने यत्फलं भवेत् तत्फलं समवाप्नोति प्रत्यहं वंदनेगुरोः गुरुर्ब्रह्मा गुरु
र्विष्णुर्गुरुर्देवो महेश्वरः संतुष्टस्तु गुरुर्यस्मै तस्मै तुष्टं जगत्त्रयम् शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन
~~संनिधाने गुरोरेव शिष्यः शिवमयो भवेत्~~ अविद्यो वा सविद्यो वा गुरुरेव हि दैवतम् अमार्गस्थोप्यमा।
र्गस्थो गुरुरेव परा गतिः यथा सिद्धरसस्पर्शात् ताम्रं भवति कांचनम् संनिधाने गुरोरेव शिष्यः शिवमयो भ।
वेत् भवार्णवतरिः शास्ता गुरुरेव सदा गतिः गुरौ तिष्ठति यस्त्वन्यमाश्रमं पूजयेज्जडः स दुर्गतिमवाप्नोति
पूजा सापि विफला भवेत् प्रणिपत्य गुरुं पश्चान्मोहाद्धि प्रतिपद्यते युगकोटिसहस्राणि नरके पच्यते तथा ४
ये गर्वेणान्यकुर्वंति पापिष्ठाः शठबुद्धयः न तेषां नरकक्लेशनिस्तारोस्ति कथंचन यैः शिष्यैः शास्त्रदारा

ध्यायेयं वोल्लवमानिताः पुत्रमित्रकलत्रादिसंपद्भ्रः प्रच्युता हि ते अधिलिप्य गुरुं मोहात्यक्त्वा पर्षं वदंति ये
स्वकरत्वं भवेत्तेषां जन्मशतेष्वपि ये गुरुद्रोहिणो मूढाः सततं पापकारिणः तेषां तु यावत्सूर्यकृतं दुष्कृ
तं स्यान्न संशयः येषां भक्तिर्गुरौ स्थैर्या भक्तिस्तेषां करे स्थिता शुश्रूषया धनैर्वाक्यैस्तुलैर्धर्म्मैः शुभावहैः व
शं कुर्याद्गुरुं धीरः स्वकंदुहृदयेन वै यस्य नास्ति गुरौ भक्तिर्दानं चापि तथाविधम् न तस्य जायते सिद्धिः कल्प
कोटिशतैरपि गुरौ भक्तिः सदा कार्या गुरुस्त्रैरोषसंयुतः महापातकयुक्तो वा गुरुर्देवः सदाशिवः तथा च
दिव्यागमे गुरुशय्यासनं यानं पादुकं चैव पीठकम् स्नानोदकं तथा छायां लंघयेन्न कदाचन गुरोरग्रे पृथ
क्पूजां मौढत्वं च विदीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत् गुरुमंत्रदेवतानामैक्यं संभावयेद्धिया वित्ता
त्प्राणमेयस्य निर्गुणस्याशरीरिणः साधकानां हितार्थाय ब्रह्मणो रूपकल्पना संतुष्टो हि गुरुर्यत्र तत्र
तुष्टो जगत्पतिः देवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन गुरोर्देहसमाश्रितमंत्रदेहो न तिष्ठति तत्पादकम
लद्वयोर्गौरी यान्मूलदः पिता तन्मात्रमेतत्सर्वं पितरं भ्यधिकं गुरुम् तस्मात्सर्वप्रयत्नेन गुरुं संमोधनादि
भिः यत्प्रकाशात्मकं स्थानं प्राप्यते शिवविड्लभम् गंधैर्माल्यैर्धूपदीपैः संपूज्य गुरुमग्रतः ततो मंत्रं च गृह्णीया
द्दक्षिणां कारयेत्सतः दशावतारास्तथा मातृः सप्तरस्तथा दश पितॄणामेकपंचाशत्स्वर्गं गच्छंति निश्चि
तम् नंदंति पितरः सर्वे पुत्रे मंत्रार्थसाधिनि गृह्णंति स्वर्गभोगांश्च स्वर्गवासः सुनिश्चयः वैष्णवे वैष्णवं चा

आ. क.
५

गाद्यं शैवं सौवं वैच शाक्तके कलौ शाक्तिप्रधानं च ब्राह्मणादिभिरेव च न शूद्रस्याधिकारोऽस्ति शूद्राणां निग

मात्मके शूद्रशिष्यमनोस्तीन मुलकर्षेन दृष्टवेथा लाभार्थे यदि तत्कुर्याद्दिक्षु मंत्रं विनैव हि प्रणवाद्येन।

दातव्यं मंत्रं शूद्राय सर्वथा आत्ममंत्रं गुरोर्मंत्रं मंत्रं चाजपकसंज्ञकम् आत्मकौलिकमंत्रं च नैव दद्यात्कदा

चन गोपालस्य मनुं दद्यान्महेशस्यापि पादजे तथा त्वां चापि सूर्यस्य गणेशस्य मनोस्तथा एषां दीक्षाधि

कारी स्यात्स पापभाग्भवेत् तद्रक्तं न च शाजे पुस्तके लिखिताविद्यायेन संदरिजप्यते न जायते तस्य

सिद्धिर्हानिरेव प्रजायते इत्यागमकल्पलतायां द्वितीयः पटलः २ गुरुश्चात्मविशुद्ध्यर्थं शिष्यांस्तु परि

शोधयेत् अब्दैकेन भवेद्योग्यो ब्राह्मणो हृदयाश्रयः वैश्यो वर्षैस्त्रिभिः शूद्रः चतुर्भिर्वत्सरैः सदा शिष्येण

पितथा कुर्यात्स्वकीयाभीष्टसिद्धये आदौ स्वप्रश्नसेव्यस्य ज्ञेय स्वाभीष्टमिक्कता गुरुरितिशेषः तथा च गौ

तमीयेतंत्रे शुभे क्षित्वानमाचार्येनमस्कृत्य प्रणम्य स्वम् सूर्यं शिवं हरिं दुर्गां वाणीं च कमलालयाम् मातरं

पितरं न त्वा ब्राह्मणान्परितोष्य च फलं पुष्पं समादाय गृहीत्वा भक्तिसंयुतः पुरुषार्थं समावाप्य समक्षं शिष्य।

गुरुमाश्रयेत् आत्मविज्ञापनं कृत्वा पितृमातृकुलान्वितम् गुरुत्वेनैव संबोध्य प्रणमेद्दण्डवद्भुवि गुरोरग्रे।

समुत्थाय कृताञ्जलिकरः स्थितः विचारय महाबाहो मद्धितं मंत्रवर्णकम् गुरुर्विचारयेत्पश्चाद्देयमंत्रोऽस्य

यत्नतः एवं च स्वतारराशिकोष्ठनामत्रकुलं भजेन्मंत्रम् एवं क्रमेण मंत्रं न दद्याद्यकुलं च नवैवच ५

इत्यादिवचनात् चक्रविचारस्यावश्यकत्वात् प्रथमं तन्निरूप्यते अथ वक्ष्ये विचारं हि चक्राणां सिद्धि
देतवे आदौ कुलाकुलं चक्रं अकथहाख्यं द्वितीयकं तृतीयमृणधनाख्यं चतुर्थं वर्गसंज्ञकम् पंचमं राशि
चक्रं स्यात् षष्ठं नक्षत्रसंज्ञकम् सप्तमं गणचक्रं स्यादष्टममकडं स्मृतम् नवमं स्याद्दिनचक्रं दशमं नाडि।
काख्यम् क्रमेणाह शारदातिलके कारणात्पंचभूतानां भूतमातृकाया ततः अतो भूतात्मका वर्णाः
पंच पंच विभागतः वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात् पंचह्रस्वाः पंचदीर्घा बिन्द्वन्ताः सं।
धिसंभवाः पंचशः कादयः षलसहा नाम समीरिताः स्वनामाद्यक्षराण्यत्र मित्रं वा स्वकुलं स्मृतम् पंचा।
पंचेति दशवर्णैः इत्यर्थः वाय्वग्नीत्यादि अआएअकचटतपयशा मारुताः इईऐखछठथफरषा।
आग्नेयाः उऊओगजडदबललाः पार्थिवाः ऋॠऔघझढधभमवा वारुणाः ऌॡअंङञणनमशहा ना
भसाः पंचह्रस्वा इति अइउऋऌ पंचदीर्घा आईऊॠॡ बिन्द्वन्ता इति बिन्दुरन्ते यस्य तेन अं इत्यर्थः एते।
न विसर्गस्यानुपयोगो लक्ष्यः तथा च पिंगलामते मंत्रसाधकयोराद्यो वर्णः स्यात्पार्थिवो यदि तत्का।
ले तस्य तत्वोक्तं तेवमन्योन्यलक्षयेत् संधिसंभवेति एऐओऔ स्वनामाद्येति एकत्रोभयावस्थाने स्वकु
ले तदुक्तं वाराहीतंत्रे साधकस्याक्षरं पूर्वं मंत्रस्यापि तथाक्षरम् यद्येकभूतदैवत्यं जानीयात्स्वकुलं हि तत्
मित्रमिति परस्परमैत्रे तदुक्तं नारायणीये पार्थिवे वारुणं मैत्रं चाग्नेयस्यापि मारुतम् पार्थिवानामकारा

अ० क० ५

णां शक्तमेवाक्रतं स्मृतम् आग्नेयस्तु भसो शक्रवंभसक्तैजसं स्मृतम् एतेषामेव सर्वेषां मविरोधेन नामा
सम् परस्परविरुद्धानां नक्षत्रमेलनं क्वचित् अकं कुलाकुलं च चक्रं समस्तं शत्रुषाधिदम् वक्ष्ये ग्रकथ्यर
चक्रं प्राञ्जलिरेखं चतुरस्रकम् मध्ये रेखाद्वयं दद्यात् त्रागयामसुदक्षायतम् चतुरस्रं भवेत्तत्र चतुष्कोष्ठसम
न्वितम् पूर्वापरायतं तद्वन्मध्ये रेखाद्वयं ततः उदग्दक्षिणदीर्घं च दद्याद्रेखाद्वयं बुधः ततः षोडश

अ	इ	उ	ऋ	ऌ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	स	ळ	स	ह
वास्य	स्त्र	भू	क्ष	क्ष

कोष्ठानां जायते चक्रवर्त्मकम् आदिक्षान्तां लिखेद्वर्णान्नु क्रमेण
नेन मन्त्रवित् पिङ्गलाम्मते इन्द्राग्निरुद्रनवनेत्रयुगार्ककुदिक्स्वर
त्वष्टषोडशचतुर्दशभौतिकेषु पातालपञ्चदशवह्निहिमांशु
कोष्ठ वर्णांल्लिखेत्सिपिभवांन्क्रमशस्तु धीमान् नामाद्यावर्णमा
रभ्य यावन्मन्त्राद्यमक्षरम् चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्ट
यम् ७नं कोष्ठकं कोष्ठेषु सव्यतो नाम आदितः सिद्धः साध्यः सु

अ क ख ट	उ ङ प	आ ग द ल	ऊ च फ
ओ ड व	ॡ ञ म	औ ह श	ॡ ण य
ई छ न	ॠ ज भ	इ ग ध	ऋ ठ क्ष
अः त स	ऐ ठ ल	अं ण ष	ए ट र

सिद्धोरिः क्रमाज्ज्ञेया विचक्षणैः सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः सुसिद्धो
ग्रहणादेव रिपुर्मूलं निकृन्तति सिद्धार्णे बान्धवा ज्ञेयाः साध्याः स्युः सेवकाः स्मृताः सुसि
द्धाः पोषकाः प्रोक्ता शत्रवो घातकाः स्मृताः जपेनबन्धुः सिद्धः स्यात्सेवकोऽधिकसेवया शुभा ५

तिपोषकोभीषं हन्तिकोनाशयेद्ध्रुवम् सिद्धसिद्धो यथोक्तश्च द्विगुणः सिद्धसाध्यकः सिद्धसुसिद्धोर्द्धजपा
त्सिद्धारिर्हन्तिबांधवान् साध्यसिद्धो द्विगुणकः साध्यसाध्यो निरर्थकः साध्यसुसिद्धोर्द्धजपात्साध्यारिर्हन्ति
गोत्रजान् सुसिद्धसिद्धोर्धजपात्तत्साध्यो द्विगुणाधिकः अर्द्धेणात्तत्सुसिद्धस्तत्सुसिद्धारिः स्वगोत्रहा अरिसि
द्धः सुतं हन्यादरिसाध्यस्तु कन्यकाम् पत्नीमरिसुसिद्धस्तु अर्यरिर्मूलघातकः इत्यकथहचक्रम् अथोक्तऋण
धनेवक्ष्ये चक्रं वर्णांकसंयुतम् तदुक्तं तंत्रराजे कथं ऋणीत्वं मंत्राणां साधकानां च मे वद पूर्वजन्मकृताभ्या
त्रि साज्जपाद्यास्तु फलासिद्धितः पापेन वै फलावाप्तिः काले देहत्रयाहृणी मंत्रः संप्राप्तिमात्रेण प्राक्तूतः सिद्धये
भवेत् सिद्धमंत्रा नगरोलेख्याः मंत्रौघः सिद्धिभाङ्नरः लक्ष्मीमतां सर्वसत्त्वो मंत्रभोगमवाप्नुयात् स मंत्रस्य
ऋणी ज्ञेयो भजनं तत्सपूर्वगम् तस्मादृणविशुद्धिस्तु कार्या सर्वैस्तु सर्वदा तथा चागमकल्पद्रुमे पूर्वाप
रं द्वादशासं यत्सत्तंघाम्योत्तरस्थं च तथा च त्रयं द्वौ द्वौ सुरोपंचसु कोष्ठकेषु शेषाणान्नरान्धसषडेकमेकम् का
दीन्तशेषान्विलिखेत्ततोणान्यैकैकमेकादशानस्थलेषु इंद्रद्वेनेत्रविपंचदशार्त्तवेदवह्न्यष्टधाष्टनवभिर्गुणि
ताश्च नामाद्यान् दिग्भूतैरिषुतिगजाग्निषु नीषु वेदवह्निभिश्च गुणिता नयसाधकोकान् इंद्रादिभिर्गजहृता
गणितैः स्वकोष्ठैः साध्यंच साधकलिपिंच दिगादिभिश्च नामाद्यलादकवर्वाद्रुजभुक्तशेषं ज्ञात्वो भयोरधिकशे
षमृणं धनं स्यात् अस्यादिभिर्गजहृतैर्गणितैः स्वकोष्ठैः साध्यं च साधकलिपिंच दिगादिभिश्च ये: यस्मिन्कोष्ठ

सा॰क॰
६

साध्यसाधकयोरंकं दृश्यते तत्कोष्ठस्थितांकं गृह्यसंख्याकैः पूरयित्वा ग्रहभिभोगमाहरेत् सर्वत्र हरणमष्ट।
भिरेव हारकाभावात्तत्र पर्यन्तावस्थानं षट्कालकाल इति क्वचन द्वयं सिद्धांकं प्रदर्शकमिति निष्कर्षः प्रकारं।
तरमाह तथा चक्रं दरीरदृश्य वृत्तौ पूर्वापरायतलेखारेखा द्वादशकं क्रमात् क्रमेणैवात्र जायते कोष्ठान्ये।
कादशाक्रमात् तेषु वर्णान्लिखेन्मंत्री स्वरादिक्रमयोगतः द्वौ द्वौ स्वरौ पंचमस्य कोष्ठकेषु शेषान्स्वरान्स्वस्वषडे।
कमेकम् कादीन्दश शेषान्विलिखेत्ततो णान्तैकैकमेकादश मात्रकेषु साध्याक्षरान्विलिखेद्धे साधकांका
नथो लिखेत् इ इत्येवं त्रैस्यादि मंत्री यद्यधिकांकः स्यात्तदा मे जपेत्सुधीः समेऽपि च जपेन्मंत्री न जपेत्त्वरः।
त्वाधिके ग्रन्ति तेन कृतांकानां षट्कं षण्जायते स्फुटम् तदेककयथामयद्वादशागारसंमितम् षट्कालका।
लविषट्प्रिसमुद्रवेदखाकाशशून्यदहनाः खेलसाध्यवर्णाः अन्यप्रकारमाह कोष्ठान्येकादशान्यथ वेदेन ॐ
पूरितानि च अकारादिहकारान्तं लिखेत्कोष्ठेषु तत्त्ववित् प्रथमं पंचमं को